२८६

नं. ३५८



5894

Part 1st - F - 5

Part 2nd F — 12

Total F — 17

७

१ ॐश्रीगणेशायनमः ॐअस्यकालाग्निरुद्रोपनि

षदः संवर्तकोऋषिः विश्वरूपोदेवता श्रीरुद्रप्री·

त्यर्थेजपेविनियोगः अथकालाग्निरुद्रंभगवन्तं

सनत्कुमारोपपृच्छ अधीहि भगवन् त्रिपुंड्रवि

धिंसतत्वं किंद्रव्यं किंस्थानं किंप्रमाणं कारेखा

केमंत्राः काशक्तिः कःकर्त्ता किंदैवतं किंफल·

राम

१

मिति तथं होवाच भगवन् कालाग्निरुद्रः द्रव्यं त
दातेयं भस्म सद्योजातमिति पंचमंत्रमनुजपेत् ॥
ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवे
नाति भवे भवस्व मां भवोद्भवाय नमः वामदेवाय न
मः ज्येष्ठाय नमो श्रेष्ठाय नमो रुद्राय नमः काला
य नमः कलिविकरणाय नमो बलिविकरणाय न

ॐ
२
१
2

मो बलायनमो बलप्रमथनायनमः सर्वभूत
दमनायनमः अघोरेभ्योऽथघोरेभ्यो घोरघोरतरे
भ्यः सर्वेभ्यः सर्वसर्वेभ्योनमस्तेऽस्तुरुद्ररूपेभ्यः त
त्पुरुषायविद्महे महादेवायधीमहि तन्नोरुद्रः प्र
चोदयात् ईशानः सर्वविद्यानामीश्वरः सर्वभूतानांब्र
ह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्माशिवोमेऽस्तुसदाशि

राम
२

वौ अग्निरितिभस्मेत्यभिमंत्र्य ॐअग्निरिति
भस्मा जलमितिभस्मा वायुरितिभस्मा स्थ
लमितिभस्मा व्योमेतिभस्मा सर्वंᳪहवाइद
मितिभस्मा मानस्तोकेतिसमुछृत्य मानस्तोके
तनयेमानआयुषिमानोगोषुमानो अश्वेषुरीरिषः
मानोवीरानरुद्रभामिनोंवधीर्हविष्मंतोनमसाविधे
मे।

ॐ
३
3

मते ॐकस्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषं यद्देवा
नां त्र्यायुषं तन्मेऽस्तुत्र्यायुषं ॐ त्र्यंबकं यजामहे सु
गंधिं पुष्टिवर्धनं उर्वारुकमिव बंधनान्मृत्योर्मुक्षी
यमामृतात् त्रियायुषैः त्रियंबकैः त्रियक्षिस्त्रो रे
खाः प्रकुर्वीत। व्रतमेतत्शांभवं तस्मात्समाचरेत् मु
मुक्षुरपुनर्भवाय अथ सनत्कुमारः प्रमाणं त्रिपुंड्रे

ण

राम
३

स्य त्रिधाचरेखा आत्मन्नारदाचक्षोराभ्रवोराचमूर्ध्नी
रामध्यतश्च याश्चप्रथमारेखासागार्हपत्यः अकारः भू
र्लोकः आत्माक्रियाशक्तिः ऋग्वेदः प्रातस्सवनं महा
देवोदेवतेति याश्चद्वितीयारेखासादक्षिणाग्निरुकार
ः सत्वमंतरिक्षमंतरात्मेच्छाशक्तिः यजुर्वेदोमाध्यंदिनं
सदाशिवोदेवतेति याश्चतृतीयारेखासा आहवनीय

ॐ
४
५

नमोपरमात्मशक्तिः सामवेदस्तृतीयः सर्वनमहेश्वरोदेव
तेति त्रिपुंड्रं भस्मनाकरोति योविद्वान् ब्रह्मचारीगृ
हीवानप्रस्थोवायतिः समस्तपापात्पूतोभवति॥
ससर्वतीर्थेसुस्नातोभवति ससर्वभोगभुग् देहंत्यक्त्वा
शिवसायुज्यमेति नचपुनरावर्तते २ इत्याहभगवान्
कालाग्निरुद्रः कालाग्निरुद्रोपनिषदं योऽकृत्वाचाधी

राम
६

ॐ १ ८

तेसोपिशिवसायुज्यमेति इत्युपनिषत् शुभम्॥

राम १

ॐश्रीगणेशाय नमः ॐविष्णुरिति आचमनत्रयम्
वाक् प्राणं चक्षुः श्रोत्रं नाभिं हृदयं कंठं शिरः शिखां बा
हुभ्यां यशो बलम् अपवित्रेति मंत्रं पठेत् ॐपुंडरीका
क्षाय नमः॥ ॐअपसर्पंतु ये भूतेति पठेत् ॐपुंडरीका
क्षाय नमः ॐअंगुष्ठाग्रे तु गोविंद इत्यादिन्यासं ॐअ
कारं नाभौ उकारं हृदये मकारं मूर्ध्नि ॐभूःपादयोः

[illegible]

ॐभुवः जान्वोः ॐस्वः गुह्ये ॐमहः नाभौ ॐजनः हृ
दये ॐतपः कंठे ॐसत्यं शिरसि ॐभूः हृदयाय नम
ः ॐभुवः शिरसे स्वाहा ॐस्वः शिखायै वौषट् ॐत
त्सवितुर्वरेण्यं इति कवचाय हुं ॐभर्गो देवस्य धीम
हि नेत्रत्रयाय वषट् ॐधियो यो नः प्रचोदयात् अ
स्त्राय फट् इति न्यासः ॐनमः शिवाय ॐनमो भग

ॐ

२ यतेरुद्राय इतिशरीरेन्यसेत् ओंकारंमूर्ध्निविन्य

२ स्य नकारंनासिकेतथा मकारंतुललाटेच भका

रंतुमुखेविन्यसेत् गकारंकंठदेशेतु वकारंहृदयेन्य

सेत् तकारंदक्षिणेहस्ते रुकारंवामतोन्यसेत् द

कारंनाभिदेशेतु यकारंपादयोन्यसेत् ओंललाटे

रुद्रं कंठेशिवं नाभौईशानं जान्वोः शंकरं न्यासं

मातृका इति ॐकारेण प्राणायामं संकल्प्य

ॐतत्सत् अद्येत्यादि आत्मनो भावशुद्ध्यर्थं विभू

तिधारणमहं करिष्ये अथ ध्यानम् ॐ शुद्धस्फ

टिकसंकाशामेकवक्त्रां चतुर्भुजां मृगचर्मधरां दे श्री १५

वीं वरदाभयशोभिनीं सर्वकामप्रदां देवीं सर्वोप

द्रवनाशिनीं सदाशिवसखीं साध्वीं निगमान्तवि

ॐ
३

हारिणीं ध्यात्वा देवीं विभूतिं वै धारयेत्पुलकां
गिभिः तीर्थं गत्वा हस्तौ पादौ प्रक्षाल्याचम्य
श्रोत्रवंधनं कृत्वा दिग्देवताभ्यो नमस्कारं ॐ
इन्द्राय नमः अग्नये नमः यमाय नमः नैर्ऋतये
नमः वरुणाय नमः वायवे नमः कुबेराय नमः
ईशानाय नमः ब्रह्मणे नमः विष्णवे नमः मंडू

कायनमः शिवादिगुरुपर्यंतंनत्वा ॐमंडूकायन
मः ॐकालाग्निरुद्रायनमः ॐकूर्मायनमः ॐआ
धारशक्तयेनमः ॐअनंतायनमः ॐपृथिव्यैन
मः इत्यासनशुद्धिंकृत्वा ॐअस्याश्रीपृथिव्यामे
रुपृष्ठऋषिः सुतलंछंदः कूर्मोदेवता आंवीजं इत्या
सनेविनियोगः ॐश्रीपृथिव्यैनमः ॐआधारशा

पृथिवीलयाधृतालोकादेवितंविष्णुनाधृतालंचधारयमांदेविप
वित्रंकुरुचासनं

ॐ
४
५

क्षयेनमः ॐभूर्भुवःस्वः क्लौंक्लींक्लींश्रींर्यींऔं फ
ट्स्वाहा आसनोपवेशनमंत्रः ॐह्रांह्रींह्रूंफट्स्वा
हा इतिजपमंत्रः इतिपृथिवीसंप्राप्य आसनेचैव
गत्वा ॐप्रणवस्यब्रह्माऋषिर्देवीगायत्रीछंदः प
रमात्मादेवता अंबीजं सोहंशक्तिः मंकीलकं बिंदु
नादेतित्रिप्रकारंज्योतिममात्मासर्वकर्मारंभप्राणा

धामेविनियोगः ॐईशानाय अंगु० ॐतत्पुरुषा
यत० ॐअघोरायम० ॐवामदेवाय अ० ॐसद्यो
जाताय क० श्रीकालाग्निरुद्रायकरत० एवंहृदया
दि० ॐभूर्भुवःस्वः भस्मनःपिप्पलादऋषिः देवी
गायत्रीछंदः श्रीकालाग्निरुद्रोदेवता भस्मधारणे
विनियोगः ॐभूः भूः भूः भस्मांगीसर्वांगेयदिमां स्प्र स्पर

ॐ
५
5

लियाद्रः स्वाहा इतिमंत्रः ध्यानं ॐ त्रिनेत्रं त्रिशीरं
घंघोडं त्रिहस्तं गुणचक्रकं त्रिपादं वह्निनयनं भ
स्मकुंडेतिविग्रहं तांडवाडंवरं भीमं रक्तं उग्रपरो
मितं रक्षामंत्रेश्वरं देवं ध्यात्वाप्नोतिलभेन्नरः ९
वं ध्यात्वाविरोगेण भस्मनोद्धारणं कुरु श्रीनंदि
केश्वरायनमः ॐ वंदित्वा श्रीसुरेंद्रेण ब्रह्मणाघो

कारेणाच अतस्त्वांपाहि नोदे विभिभूतिर्भूतिदा
भवेत ॐअग्निरितिभस्म ॐजलमितिभस्म ॐ
स्थलमितिभस्म ॐवायुरितिभस्म ॐव्योमेति
भस्म ॐमनः सहितानिद्रेंद्रियाणिभस्मेवसर्वं
सहायनमः ॐईशानायनमः ॐतत्पुरुषायनमः
ॐअघोरायनमः ॐवामदेवायनमः ॐसर्वत्रस

ॐ

६ द्योजातायनमः इति मंत्रः ॐ भूर्भुवः स्वः सद्यो

6 जातमंत्रस्य ॐ ह्रां ह्रीं ह्रूं यां ह्रीं श्रैं श्रैं श्रैं भस्मांगी सर्वां

गेश्वरी हुं फट् स्वाहा ॐ त्र्यंबकं यजामहे सुगंधिं पु

ष्टिवर्द्धनं उर्वारुकमिव बंधनान्मृत्योर्मोक्षीयमा

मृतात् ॐ नमः शिवाय ह्रीं ह्रीं ह्रीं अयकारसंपुटं कृ

त्वा इत्यभिमंत्र्य किंचिद्गृहीत्वा आपो हिष्ठेत्यापः

संप्रोक्ष्य वामहस्ते त्रिकोणमालिख्य षट्कोणंच त
न्मध्ये ह्रींबीजाक्षरं लिखित्वा द्वादशवारं चाभिमंत्र्य
किंचिद्भस्मो विसृज्य अथांबुना भस्ममालोड्य दीप्त
चंडाय नमः अंगुष्ठेन शिरसि प्रदक्षिणं कृत्वा ॐ नमो भ
गवते ब्रह्मणे नमः ततो पंचब्रह्ममंत्राः ॐ ईशानमं
त्रस्य ईशानरुद्रो देवता दुर्वासा ऋषिः अनुष्टुप्छंद

: ईशानप्रसादसिध्यर्थेजपेविनियोगः ईशानःसर्व
विद्यानामीश्वरःसर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो
धिपतिःब्रह्माशिवोमेअस्तुसदाशिवों इतिशिर
सि ॐतत्पुरुषमंत्रस्यतत्पुरुषरुद्रोदेवता दधिऋ
षिःदेवीगायत्रीछंदः तत्पुरुषप्रसादसिध्यर्थेजपेवि
नियोगः ॐतत्पुरुषायविद्महे महादेवायधीमहि त

न्नो रुद्रः प्रचोदयात् इति पूर्वमुखे ॐ अघोर मंत्र
स्य अघोर ऋषिः अघोर रुद्रो देवता अनुष्टुप्छंदः अघो
र प्रसाद सिद्ध्यर्थे जपे विनियोगः ॐ अघोर घोर महा
घोर वज्र घोर शिव घोर प्राण घोर हुं फट् स्वाहा ॐ अघो
रेभ्योथ घोरेभ्यो घोर घोरांतरेभ्यः सर्वेभ्यः सर्वशर्वे
भ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः इति दक्षिणमुखे ॐ वा

८
8

मदेवमंत्रस्य वामदेवऋषिः वामदेवरुद्रो देवता त्रि
ष्टुप्छंदः वामदेवप्रसादसिद्ध्यर्थे जपे विनियोगः ॐ वा
मदेवाय नमः ॐ ज्येष्ठाय नमः ॐ श्रेष्ठाय नमः ॐ रुद्रा
य नमः ॐ कालाय नमः ॐ कलविकरणाय नमः
ॐ बलविकरणाय नमः ॐ बलाय नमः ॐ बलप्रमथ
नाय नमः सर्वभूतदमनाय नमः ॐ मनोन्मनाय न

मः इतिपश्चिममुखे ॐसद्योजातमंत्रस्य सद्योजा
तऋषिः सद्योजातरुद्रोदेवता जगतीछंदः सद्यो
जातप्रसादसिद्ध्यर्थेजपेविनियोगः ॐसद्योजातं
प्रपद्यामिसद्योजातायवैनमः भवेभवेनातिभवेभ
वस्वमांभवोद्भवायनमः इत्युत्तरमुखे ॐईशानाय
नमःशिरसि तत्पुरुषायनमः मुखमध्ये ॐअघो

रायनमः हृदये ॐ वामदेवायनमः गुह्ये ॐ सद्यो
जातायनमः पादयोः ॐ श्रीशिवायनमः सर्वांगे
ॐ ह्रीं ह्रीं श्रीकरं पवित्रं चरोगदोषविनाशनं लोकेव
श्यकरं पुण्यं भस्मं त्रैलोक्यपावनं ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्र
ः वृषवाहनायनमः पुनरपिन्यासं ॐ ह्रां अं ॐ ह्रीं
त० ॐ ह्रूं म० ॐ ह्रैं अ० ॐ ह्रौं क० ॐ ह्रः क० एवं हृदया

दि॥ अथ ध्यानम् ॐ शांतं पद्मासनस्थं शशिधर
मुकुटं पंचवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुम भयं
दक्षिणांगे वहंतं नागं पाशं च घंटां डमरुकसहितं सां
कुशं वामभागे नानालंकारयुक्तं स्फटिकमणिनि
भं ज्ञानमूर्तिं नमामि इति ध्यानं ललाटे ब्रह्मणे न
मः नेत्रयोः चंद्रसूर्याभ्यां नमः नाशिकयोः कुबे

ॐ

१०

10

गायनमः जिह्वाग्रे सरस्वत्यैनमः कंठे नीलकं
ठायनमः कर्णयोः विरूपाक्षायनमः हृदये ह
व्यवाहनायनमः नाभौ स्कंधायनमः उदरे अनं
तायनमः दक्षिणबाहुमूले रुद्रायनमः ~~दक्षिण~~ वाम
बाहुमध्ये आदित्यायनमः दक्षिणबाह्वग्रे वसु
भ्योनमः वामबाहुमूले वामदेवायनमः वामबा

हृन्मध्ये शशिसूर्याभ्यांनमः वामबाहुमूले प्रभं
जनायनमः मूर्ध्नि परमात्मनेनमः ग्रीवां पशुपं
पतयेनमः पृष्ठे हरायनमः कटिदेशे श्रीकाला
ग्निरुद्रायनमः कक्षौ सप्तसमुद्रायनमः शिश्ने
सप्तसमुद्रायनमः गुह्ये दीप्तचंडायनमः जानुनी
जाह्नव्येनमः कूर्मचक्रे वराहायनमः गुल्फयोः

११ भैरवायनमः पादयोः वासुकीयनमः पादाग्रे सर्व
तीर्थेभ्योनमः सर्वांगे सदाशिवायनमः भस्मोद्धूलि
तसर्वांगे आपादतलमस्तके रोमेरोमेभवेल्लिंगंस्व
शरीरंशिवालयं इतिविभूतीधारणम् विभूतीनिंद
तेयोवै ब्राह्मणोचान्यजातिच पततिनरकेघोरे याव
ब्रह्माचतुर्मुखः श्राद्धयज्ञेजपेहोमे वैश्वदेवेसुरार्चनेवि
वे

पुंड्रं धार्यमानेन सर्वकामफलं लभेत्॥ मध्यमाना
मिकांगुष्ठैः क्रियमाणे त्रिपुंड्रकं महाघोरकृतं पाप
मुच्यते नात्र संशयः जलस्नानात् मलत्यागी भ
स्मस्नानात् सदाशुचिः मंत्रस्नानं हरेत्पापं ज्ञानस्ना
नं परं पदम्॥ सर्वतीर्थेषु यत्पुण्यं सर्वयज्ञेषु यत्फलं
तत्फलं समवाप्नोति भस्मस्नानान्न संशयः भस्म

३८

१२ स्नानं परं तीर्थं गंगास्नानं दिने दिने भस्मरूपी शिवः
साक्षात् भस्म त्रैलोक्यपावनम् ॐ विष्णुः ३ इत्युप
12 निषत् शिवाय नमः ॥ शुभम् ॥